श्री भगवान् उवाच । śrībhagavānuvāca ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।।२.११

aśocyānanvaśocatvam prajnāvādāṁśca bhāṣase ।
gatāsūnagatāsūṁśca nānuśocanti paṇḍitāḥ ।।2.11

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्।।२.१२

na tvevāham jātu nāsam na tvam neme janādhipāḥ ।
na caiva na bhaviṣyāmaḥ sarve vayamataḥ param ।।2.12

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।२.१३

dehino'sminyathā dehe kaumāraṁ yauvanaṁ jarā ।
tathā dehāntaraprāptir-dhīrastatra na muhyati ।।2.13

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।।२.१४

mātrāsparśāstru kaunteya śītoṣṇasukhaduḥkhadāḥ ।
āgamāpāyinonityās-tāṁstitikṣasva bhārata ।।2.14

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभम्।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।।२.१५

yaṁ hi na vyathayantyete puruṣam puruṣarṣabha ।
samaduḥkhasukhaṁ dhīraṁ somrutatvāya kalpate ।।2.15